गरः इति विषे नित्यं न भवति। निगार्यते, निगाल्यते इति णिलोपस्य स्थानिवद्भावात् 'अचि विभाषा' इति लत्वविकल्पः। 'पूर्वत्रासिद्धे न स्थानिवत्' (पु.वृ. ११२) इति एतदपि सापवादमेव, तस्य दोषः संयोगादिलोप[1]लत्वणत्वेषु इति[2]। अन्तरङ्गत्वाद् वा कृते लत्वविकल्पे णिलोपो भविष्यति। गिरौ, गिरः इत्यत्र धातोः स्वरूपग्रहणे तत्प्रत्यये [3]कार्यविज्ञानम् इति लत्वं न भवति। [4]गिरतिर्वा लत्वविधावधिकृतः, गृणातेरेतद् रूपम्॥

## परेश्च घाङ्कयोः। (२२/३२६२)

परि इत्येतस्य यो रेफः तस्य घशब्दे अङ्कशब्दे च परतो विभाषा लकार आदेशो भवति। परिघः, पलिघः। पर्यङ्कः, पल्यङ्कः। घ इति स्वरूपग्रहणमत्रेष्यते, न तरप्तमपौ (१.१.२२/२००३) इति।

[९१६] योगे चेति वक्तव्यम्। (म. भा. ३.४००)

परियोगः, पलियोगः॥

## संयोगान्तस्य लोपः। (२३/५४)

संयोगान्तस्य पदस्य लोपो भवति। गोमान्। [5]यवमान्। कृतवान्। हतवान्। इह [6]श्रेयान्, भूयान् इति रुत्वम् परम् अपि असिद्धत्वात् [7]संयोगान्तस्य लोपं न बाधते। जश्त्वे तु नाप्राप्ते तदारभ्यते इति तस्य बाधकं [8]भवति, यशः, पयः इति। दध्यत्र, मध्वत्र, इत्यत्र तु यणादेशस्य बहिरङ्गलक्षणस्यासिद्धत्वात् संयोगान्तलोपो न भवति[9]॥

## रात् सस्य। (२४/३८०)

[10]संयोगान्तपदस्य यो रेफः तस्मादुत्तरस्य [11]अन्तस्य सकारस्य लोपो भवति। गोभिरक्षाः। 'प्रत्यञ्चमत्साः' (ऋ. १०.२८.४)। क्षरतेः त्सरतेश्च लुङि सिचः छान्दसत्वाद् ईडभावः 'बहुलं छन्दसि' (७.३.९७/३५८६) इति वचनात्। [12]दीर्घे सति रूपमेतत्। मातुः, पितुः इति 'ऋत उत्' (६.१.१११/२७९) इति उत्त्वे कृते रपरत्वे च सति 'रात् सस्य' इति सलोपः[13]। सिद्धे सत्यारम्भो नियमार्थः, रात् सस्य एव लोपो भवति, नान्यस्य इति। ऊर्जेः [14]क्विप् – ऊर्क्। मृजेः लङि – अमार्ट्॥

## धि च (२५/२२४९)

[15]धकारादौ प्रत्यये परतः [16]सकारस्य लोपो भवति। अलविध्वम्, अलविढ्वम्। अपविध्वम्, अपविढ्वम्। यद्यत्र सकारलोपो न स्यात्, सिचः षत्वे जश्त्वे च[17] 'विभाषेटः' (८.३.७९/२३२५) इति मूर्धन्याभावपक्षेऽपि न धकारः श्रूयेत।

इतः प्रभृति सिचः [18]सकारस्य लोप इष्यते। इह न भवति, चकाद्धि पलितं शिरः इति। तथा पयो धावति इत्येवमादावपि न भवति। सग्धिः (वा. सं. १९.९), बब्धाम् (नि. ५.१२) इति छान्दसो वर्णलोपः। भाष्यकारस्त्वाह, चकाधि इत्येव भवितव्यम् इति। तेन पयो धावति इत्येवमादौ यत्नान्तरमास्थेयम्।

---

1. लक्षणत्वेषु इ. 2. कृत्वा इ यधिकम् क. ड. 3. कार्यविधानात् सिद्धम् इति क. इ. 4. वाक्यमिदं नास्ति क. 5. यावान् इ. 6. श्रेयान् नास्ति ब. 7. संयोगान्तलोपं इ. 8. भविष्यति ह. 9. पदस्य इति किम्? गोमन्तः इति इत्यधिकम् क. 10. संयोगान्तस्य पदान्तस्य रेफादुत्तरस्य ई. ड. ह, संयोगान्तस्य लोप. इति सर्वमनुवर्तते इत्यधिकम् ड. 11. अलोऽन्त्यस्य ई.क.ड.ह. 12. दीर्घरूपमेतत् क. 13. क्रियते इत्यधिकम इ. क. ह. 14. क्विपि ई. 15. सस्य इति वर्तते इत्यधिकम् ड. 16. सस्य इ. 17. सति इत्यधिकम् इ. 18 सकारलोपः इ.